## लुबविशेषे । (४/१२०५)

पूर्वेण विहितस्य प्रत्ययस्य लुब् भवति अविशेषे[1] । [2]न चेन् [3]नक्षत्रयुक्तस्य कालस्य [4]रात्र्यादिविशेषोऽभिधीयते । यावान् कालो नक्षत्रेण युज्यते [5]अहोरात्रः, (म.भा. २.२७३) तस्याविशेषे [6]लुब् भवति । अद्य पुष्यः । अद्य कृत्तिकाः । अविशेषे इति किम् ? पौषी रात्रिः । पौषमहः[7] ॥

## सञ्ज्ञायां श्रवणाश्वत्थाभ्याम् । (५/१२०६)

अविशेषे [8]लुप् विहितः पूर्वेण, विशेषार्थोऽयमारम्भः । श्रवणशब्दाद् अश्वत्थशब्दाच्चोत्पन्नस्य प्रत्ययस्य [9]लुब् भवति सञ्ज्ञायां विषये । श्रवणा रात्रिः । अश्वत्थो मुहूर्तः । लुपि युक्तवद्भावः कस्मान् न भवति ? निपातनात् 'विभाषा फाल्गुनीश्रवणाकार्तिकी[10]चैत्रीभ्यः' (४.२.२३/१२२५) इति । सञ्ज्ञायाम् इति किम् ? श्रावणी, [11]आश्वत्थी रात्रिः[12] ॥

## द्वन्द्वाच् छः । (६/१२०७)

नक्षत्रद्वन्द्वात् तृतीयासमर्थाद् [13]युक्ते काले छः प्रत्ययो भवति, विशेषे चाविशेषे च । राधानुराधीया रात्रिः । तिष्यपुनर्वसवीयमहः । अविशेषे – राधानुराधीयम्[14] । [15]अद्य तिष्य[16]पुनर्वसवीयम् । [17]लुपं परत्वाद् बाधते[18] ॥

## दृष्टं साम । (७/१२०८)

तेन इति तृतीयासमर्थाद् दृष्टं [19]साम इत्येतस्मिन्नर्थे यथाविहितं [20]प्रत्ययो भवति, यद् दृष्टं साम चेत्तद् भवति । क्रुञ्चेन दृष्टं क्रौञ्चं साम (तै. २.५.११.१) । [21]वासिष्ठम् । वैश्वामित्रम् (ऐ.ब्रा. ६.२०) ॥

## कलेर्ढक् । (८/१२०९)

कलिशब्दात् [22]तृतीयासमर्थाद् दृष्टं [23]साम इत्येतस्मिन्नर्थे ढक् [24]प्रत्ययो भवति । [25]अणोऽपवादः । कलिना दृष्टं साम कालेयम् ।

[४०१] सर्वत्राग्निकलिभ्यां ढग् वक्तव्यः । (म.भा. २.२७३)

अग्निना दृष्टम्[26] आग्नेयम् । एवम् अग्नौ भवम्, अग्नेरागतम्, अग्नेः स्वम् (म. भा. २. २७३) इति सर्वत्र ढग् एव भवति । [27]आग्नेयम् । तथा कालेयम् [28]अपि प्रतिपत्तव्यम् ।

[४०२] दृष्टे सामनि[29] अण् वा डिद् भवतीति वक्तव्यम् । (म.भा. २.२७३)

उशनसा दृष्टं साम औशनसम्, औशनम् ।

[४०३) जाते चार्थे योऽन्येन बाधितः पुनरण् विधीयते स वा डिद् भवतीति वक्तव्यम् । (म. भा. २. २७३)

---

1. गण्यमाने इत्यधिकम् ह, अविशेषेण च गण्यमाने फ. 2. न नास्ति फ. 3. नक्षत्रेण युक्तस्य ब. 4. रात्र्या विशेषो ह. 5. अहोरात्रादिः क. 6. लुक् ब.क. 7. माघमहः इत्यधिकम् क.फ. 8–9. लुक् क. 10. चैत्राभ्यः ह. 11. आश्वत्थी नास्ति ग. 12. अश्वत्थशब्देन अश्विनी नक्षत्रमुच्यते – अश्वथो मुहूर्तः इत्यधिकम् ग.ह. 13. युक्तः कालः इत्यस्मिन्नर्थे अ. 14. अहः इत्यधिकम् ह. 15. अद्य नास्ति क. 16. पुनर्वस्वीयम् क. 17. लुप् च फ. 18. छः इत्यधिकम् ब.ह. 19. साम नास्ति ब.फ. 20. अण् इत्यधिकम् फ. 21. वासिष्ठम् नास्ति ह, वसिष्ठेन दृष्टं साम वासिष्ठम् ग. 22. तृतीयासमर्थात् नास्ति ह. 23. साम नास्ति फ. 24. प्रत्ययः नास्ति ग. 25. अणोऽपवादः नास्ति फ. 26. साम इत्यधिकम् ड.फ. 27. अग्निः देवता अस्य इति इत्यधिकम् फ, नास्ति ब.क. 28. इति इत्यधिकम् फ. 29. जाते वा इत्यधिकम् फ.ह.